# hanumadaShTottarashatanAmastutiH 5

# હનુમદષ્ટોત્તરશતનામસ્તુતિઃ ૫

## Document Information

Text title : hanumadaShTottarashatanAmastutiH 5

File name : hanumadaShTottarashatanAmastutiH5.itx

Category : aShTottarashatanAma, hanumaana

Location : doc_hanumaana

Transliterated by : Shri Devi Kumar, refined by PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication

Acknowledge-Permission: Mahaperiyaval Trust

Latest update : April 24, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# હનુમદષ્ટોત્તરશતનામસ્તુતિઃ ૫

(કાર્યકારસ્વામિનાથાર્યવિરચિતા રામનામાઙ્કિતા)

રામદૂતો રામભૃત્યો રામચિત્તાપહારકઃ ।
રામનામજપાસક્તો રામકીર્તિપ્રચારકઃ ॥ ૧॥

રામાલિઙ્ગનસૌખ્યજ્ઞો રામવિક્રમહર્ષિતઃ ।
રામબાણપ્રભાવજ્ઞો રામસેવાધુરન્ધરઃ ॥ ૨॥

રામહૃત્પદ્મમાર્તણ્ડો રામસઙ્કલ્પપૂરકઃ ।
રામામોદિતવાગ્વૃત્તિઃ રામસન્દેશવાહકઃ ॥ ૩॥

રામતારકગુહ્યજ્ઞો રામાહ્લાદનપણ્ડિતઃ ।
રામભૂપાલસચિવો રામધર્મપ્રવર્તકઃ ॥ ૪॥

રામાનુજપ્રાણદાતા રામભક્તિલતાસુમમ્ ।
રામચન્દ્રજયાશંસી રામધૈર્યપ્રવર્ધકઃ ॥ ૫॥

રામપ્રભાવતત્ત્વજ્ઞો રામપૂજનતત્પરઃ ।
રામમાન્યો રામહૃદ્યો રામકૃત્યપરાયણઃ ॥ ૬॥

રામસૌલભ્યસંવેત્તા રામાનુગ્રહસાધકઃ ।
રામાર્પિતવચશ્ચિત્તદેહવૃત્તિપ્રવર્ત્તિતઃ ॥ ૭॥

રામસામુદ્રિકાભિજ્ઞો રામપાદાબ્જષટ્પદઃ ।
રામાયણમહામાલામધ્યાઞ્ચિતમહામણિઃ ॥ ૮॥

રામાયણરસાસ્વાદસ્રવદશ્રુપરિપ્લુતઃ ।
રામકોદણ્ડટઙ્કારસહકારિમહાસ્વનઃ ॥ ૯॥

રામસાયૂજ્યસામ્રાજ્યદ્વારોદ્ઘાટનકર્મકૃત્ ।
રામપાદાબ્જનિષ્યન્દિમધુમાધુર્યલોલુપઃ ॥ ૧૦॥

રામકૈઙ્કર્યમાત્રૈકપુરુષાર્થકૃતાદરઃ ।

રામાયણમહામ્ભોધિમથનોત્થસુધાઘટઃ ॥ ૧૧॥

રામાખ્યકામધુગ્દોગ્ધા રામવક્ત્રેન્દુસાગરઃ ।
રામચન્દ્રકરસ્પર્શદ્રવચ્છીતકરોપલઃ ॥

રામાયણમહાકાવ્યશુક્તિનિક્ષિપ્તમૌક્તિકઃ ।
રામાયણમહારણ્યવિહારરતકેસરી ॥ ૧૩॥

રામપત્ન્યેકપત્નીત્વસપત્નાયિતભક્તિમાન્ ।
રામેઙ્ગિતરહસ્યજ્ઞો રામમન્ત્રપ્રયોગવિત્ ॥ ૧૪॥

રામવિક્રમવર્ષર્તુપૂર્વભૂનીલનીરદઃ ।
રામકારુણ્યમાર્ત્તણ્ડપ્રાગુદ્યદરુણાયિતઃ ॥ ૧૫॥

રામરાજ્યાભિષેકામ્બુપવિત્રીકૃતમસ્તકઃ ।
રામવિશ્લેષદાવાગ્નિશમનોદ્યતનીરદઃ ॥ ૧૬॥

રામાયણવિયદ્ગઙ્ગાકલ્લોલાયિતકીર્તિમાન્ ।
રામપ્રપન્નવાત્સલ્યવ્રતતાત્પર્યકોવિદઃ ॥ ૧૭॥

રામાખ્યાનસમાશ્વસ્તસીતામાનસસંશયઃ ।
રામસુગ્રીવમૈત્ર્યાખ્યહવ્યવાહેન્ધનાયિતઃ ॥ ૧૮॥

રામાઙ્ગુલીયમાહાત્મ્યસમેધિતપરાક્રમઃ ।
રામાર્ત્તિધ્વંસનચણચૂડામણિલસત્કરઃ ॥ ૧૯॥

રામનામમધુસ્યન્દદ્વદનામ્બુજશોભિતઃ ।
રામનામપ્રભાવેણ ગોષ્પદીકૃતવારિધિઃ ॥ ૨૦॥

રામૌદાર્યપ્રદીપાર્ચિર્વર્ધકસ્નેહવિગ્રહઃ ।
રામશ્રીમુખજીમૂતવર્ષણોન્મુખચાતકઃ ॥ ૨૧॥

રામભક્ત્યેકસુલભબ્રહ્મચર્યવ્રતે સ્થિતઃ ।
રામલક્ષ્મણસંવાહકૃતાર્થીકૃતદોર્યુગઃ ॥ ૨૨॥

રામલક્ષ્મણસીતાખ્યત્રયીરાજિતહૃદ્ગુહઃ ।
રામરાવણસઙ્ગ્રામવીક્ષણોત્ફુલ્લવિગ્રહઃ ॥ ૨૩॥

રામાનુજેન્દ્રજિદ્યુદ્ધલબ્ધવ્રણકિણાઙ્કિતઃ ।
રામબ્રહ્માનુસન્ધાનવિધિદીક્ષાપ્રદાયકઃ ॥ ૨૪॥

રામરાવણસઙ્ગ્રામમહાધ્વરવિધાનકૃત્ ।
રામનામમહારત્નનિક્ષેપમણિપેટકઃ ॥ ૨૫॥

રામતારાધિપજ્યોત્સ્નાપાનોન્મત્તચકોરકઃ ।
રામાયણાખ્યસૌવર્ણપઞ્જરસ્થિતશારિકઃ ॥ ૨૬॥

રામવૃત્તાન્તવિધ્વસ્તસીતાહૃદયશલ્યકઃ ।
રામસન્દેશવર્ષામ્બુવહન્નીલપયોધરઃ ॥ ૨૭॥

રામરાકાહિમકરજ્યોત્સ્નાધવલવિગ્રહઃ ।
રામસેવામહાયજ્ઞદીક્ષિતો રામજીવનઃ ॥ ૨૮॥

રામપ્રાણો રામવિત્તં રામાયત્તકલેવરઃ ।
રામશોકાશોકવનભઞ્જનોદ્યત્પ્રભઞ્જનઃ ॥ ૨૯॥

રામપ્રીતિવસન્તર્તુસૂચકાયિતકોકિલઃ ।
રામકાર્યાર્થોપરોધદૂરોત્સારણલમ્પટઃ ॥ ૩૦॥

રામાયણસરોજસ્થહંસો રામહિતે રતઃ ।
રામાનુજક્રોધવહ્નિદગ્ધસુગ્રીવરક્ષકઃ ॥ ૩૧॥

રામસૌહાર્દકલ્પદ્રુસુમોદ્ગમનદોહદઃ ।
રામેષુગતિસંવેત્તા રામજૈત્રરથધ્વજઃ ॥ ૩૨॥

રામબ્રહ્મનિદિધ્યાસનિરતો રામવલ્લભઃ ।
રામસીતાખ્યયુગલયોજકો રામમાનિતઃ ॥ ૩૩॥

રામસેનાગ્રણી રામકીર્તિઘોષણડિણ્ડિમઃ ।
રામેતિદ્વ્યક્ષરાકારકવચાવૃતવિગ્રહઃ ॥

રામાયણમહાવૃક્ષફલાસક્તકપીશ્વરઃ ।
રામપાદાશ્રયાન્વેષિવિભીષણવિચારવિત્ ॥ ૩૫॥

રામમાહાત્મ્યસર્વસ્વં રામસદ્ગુણગાયકઃ ।
રામજાયાવિષાદાગ્નિનિર્દગ્ધરિપુસૈનિકઃ ॥ ૩૬॥

રામકલ્પદ્રુમૂલસ્થો રામજીમૂતવૈદ્યુતઃ ।
રામન્યસ્તસમસ્તાશો રામવિશ્વાસભાજનમ્ ॥ ૩૭॥

રામપ્રભાવરચિતશૈત્યવાલાગ્નિશોભિતઃ ।
રામભદ્રાશ્રયોપાત્તધીરોદાત્તગુણાકરઃ ॥ ૩૮॥

રામદક્ષિણહસ્તાબ્જમુકુટોદ્ભાસિમસ્તકઃ ।
રામશ્રીવદનોદ્ભાસિસ્મિતોત્પુલકમૂર્તિમાન્ ।
રામબ્રહ્માનુભૂત્યાપ્તપૂર્ણાનન્દનિમજ્જિતઃ ॥ ૩૯॥

ઇતીદં રામદૂતસ્ય વાયુસૂનોર્મહાત્મનઃ ।
રામનામાઙ્કિતં નામમષ્ટોત્તરશતં શુભમ્ ॥ ૪૦॥

પ્રસાદાદાઞ્જનેયસ્ય દેશિકાનુગ્રહેણ ચ ।
રચિતં સ્વામિનાથેન કાર્યકારેણ ભક્તિતઃ ॥ ૪૧॥

ભૂયાદભીષ્ટફલદં શ્રદ્ધયા પઠતાં નૃણામ્ ।
ઇહલોકે પરત્રાપિ રામસાયૂજ્યદાયકમ્ ॥ ૪૨॥

From Hanumatstutimanjari, Mahaperiaval Publication
Proofread by PSA Easwaran psaeaswaran at gmail

*hanumadaShTottarashatanAmastutiH 5*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*